# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा - शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ४ | गुणाः - ७० |
|---|---|---|
| विषयः - प्राच्यार्थशास्त्रम् एवं राजनीतिशास्त्रम् | (G.E.-2.3.3.New) | |
| दिनाङ्कः - ०७/१२/२०१८ | (ग्रन्थः कौटिल्यार्थशास्त्रम् ५,६,७ अधिकारणानि) | समयः -०२.०० तः ०५.०० |

**प्रश्नः १ कयोश्चिद् द्वयोः श्लोकयोः संस्कृते ससन्दर्भं व्याख्या कार्या ।** **( १० )**

(१) स्वपक्षे परपक्षे वा तूष्णीं दण्डं प्रयोजयेत् ।
आपत्यां च तदात्वे च क्षमावानविशङ्कितः ॥

(२) पक्कं पक्कमिवारामात् फलं राज्यादवाप्नुयात् ।
आत्मच्छेदमयादामं वर्जयेत् कोपकारकम् ॥

(३) सत्रिणश्चायुधीयानां वेश्याः कारु कुशीलवाः ।
दण्ड वृद्धाश्च जानीयुः शौचाशोचमन्द्रिताः ॥

**प्रश्नः २ अधोलिखितेषु कस्यचिदेकस्य प्रश्नस्य उत्तरं निबन्धात्मकं लिखत ।** **( १० )**

(१) भृत्यानां भरणपोषणविषये सविस्तरं लिखन्तु ।

(२) प्रकृत्याः गुणाः के ? स्वामीनः गुणान् वर्णयन्तु ।

**प्रश्नः ३ कयोश्चिद द्वयोः संस्कृते भावार्थं लिखत ।** **( १० )**

(१) आत्मकँस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा ।
नयज्ञः पृथिवीं कृत्स्नां जयत्वेव न हीयते ॥

(२) एवं षड्भिर्गुणैरेतैः स्थितः प्रकृतिमण्डले ।
पर्यषेत क्षयात् स्थानं स्थानाद् वृद्धिं च कर्मसु ॥

(३) शौर्यममर्षः शीघ्रता दाक्ष्यं चोत्साहगुणाः ॥

**प्रश्नः ४ अधोलिखितेषु कस्यचिदेकस्य प्रश्नस्य उत्तरं निबन्धात्मकं लिखत ।** **( १० )**

**( १ )** सन्धिः एव विग्रहः इत्यनयोः विषये सविस्तरं लिखत ।

**( २ )** यानस्य आसनस्य एवं संश्रयस्य द्वैधीभावस्य वर्णनं कुर्वन्तु ।

**प्रश्नः ५ कयोश्चिद् द्वयोः संस्कृते ससन्दर्भं व्याख्या कार्या । ( १० )**

(१) भूम्यकेदेशत्यागेन शेषप्रकृतिरक्षणम् ।

आदिष्टसन्धिस्तत्रेष्टो गुढस्तेनोपधातिनः ॥

(२) फलदानेन भूमीनां मोक्षकं स्वादवक्रयः ।

फलातिभुक्तो भूमिभ्यः सन्धिः सपरदूषणः ॥

(३) विग्रहे हि क्षयव्ययप्रवास प्रत्ययवाचा भवन्ति ॥

**प्रश्नः ६ अधोलिखितेषु कस्यचिदेकस्य प्रश्नस्य उत्तरं विस्तरेण लिखत । ( १० )**

(१) परिपणितकालः सन्धिः कः ?

(२) अपरिपणितः सन्धिः कः ?

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखत । ( १० )**

(१) सप्तमाधिकरणे कति अध्यायाः सन्ति ?

(२) अस्य ग्रन्थस्य रचनाकारः कः ?

(३) पञ्चमाधिकरणे का चर्चा अस्ति ?

(४) कोषे नष्टे एवम् अर्थसङ्कटे नृपेण किं कर्तव्यम् ?

(५) राज्यकरः कति वारं स्वीकरणीयः ?

(६) 'प्रकाशयुद्धम्' इत्युक्ते किम् ?

(७) 'कूटयुद्धम्' इत्युक्ते किम् ?

(८) 'तूष्णीयुद्धम्' इत्युक्ते किम् ?

(९) सन्धेः के धर्माः ?

(१०) विग्रहस्य के धर्माः ?

(११) पुरुषार्थाः कति सन्ति ?

(१२) अर्थशास्त्रप्रणेतुः नाम किम् ?

(१३) आश्रमाः कति सन्ति ?

(१४) कौटिल्यार्थशास्त्रे कति अधिकरणानि सन्ति ?

(१५) कौटिल्यस्यापरं नाम किम् ?

--००--